# पण्डितराजजगन्नाथदृशा अभिधाविमर्शः

**बिपिन कुमार झा***
kumarvipin.jha@gmail.com

**शोधसारः**

*'नास्ति जगन्नाथसदृशः कश्चन' इति स्मारं स्मारं यदा रसगंगाधरस्यपानं जायते तदा नूनमेव जगन्नाथस्य वैदुष्यदर्शनं भवति तैलंगीयः स स्वकीये ग्रन्थे नव्यन्यायशैल्यनुम्य साहित्यसास्त्रस्योत्कृष्टं निदर्शनं प्रस्तुतम् अस्ति। तत एव अभिधा सन्दर्भिता काचित् गूढा चर्चा विहिता अस्ति। तस्या एव विश्लेषणपूर्वकम् अत्र शोधपत्ररूपे उपस्थापनं क्रियते। अत्र वैदुष्यप्रदर्शनं विहाय मूलविषयवस्तूनां विश्लेषणम् एव अंगीकृतम् अस्ति।*

**कूटशब्दाः-** जगन्नाथः, अभिधा, नैयायिकाः, दीक्षितः

## अभिधापरिचयः-

"शक्याख्योऽर्थस्य शब्दगतः, शब्दस्यार्थगत वा सम्बन्धविशेषोऽभिधा" । शब्दार्थयो पारस्परिकसम्बन्धः अभिधा। रसगंगाधरे पण्डितराजजगन्नाथ अभिधा विषयकमतान्तराणि प्रदर्शयति।

### प्रथमवादीनां मतम् -

सा च पदार्थान्तरमिति केचित्। अत्र 'सा' इत्युक्ते अभिधा एवं केचित् इत्युक्ते वैयाकरणाः एवं मीमांसकाः भवंति। प्रथममतम् - "ईश्वरेच्छा रुपा नास्ति।" - वैयाकरणमीमांसकानां मते। सा अभिधा - १) बोधकभावरुपा, २) बोधकत्वभावरुपा, ३) बोध्यताभावरुपा अथवा शब्दार्थयोः तादात्म्यरूपा।

### द्वितीयमतम् -

नैयायिकानां मते "ईश्वरेच्छारूपा अस्ति।" नैयायिकमते ईश्वरेच्छा इति द्विविधा———

१) अर्थविशेषः, २) पदविशेषः।

**दोषः -**

अत्र साहित्यिकाः दोषम् उपस्थापयंति यथा -

"इश्वरेच्छा एका नित्या च।" यदि एका नित्या तर्हि सर्वविषयिणी भवति। यदि सर्वविषयिणी भवति तर्हि अव्यवस्था भविष्यति। सर्वविषयिणी कथनेन घटः शब्दस्य अर्थः पटः भविष्यति एवं पटः शब्दस्य अर्थः घटः भविष्यति।

ज्ञान-यत्न-अभिधा-माध्यमेन भवति ईश्वरेच्छा निमितं अभिधा।

---

*** साहित्यविभागाध्यापकः राष्ट्रीय संस्कृत संस्थानम्, पुरी ओडिशा।**

**निष्कर्षः -**

ईश्वरेच्छा रूपा अस्ति इति न युक्तियुक्तम्। प्रथममतं समीचीनम् इति।

## दीक्षितमते अभिधाया लक्षणम् -

अप्पयदीक्षितः वृत्तिवार्त्तिककारः । तस्य मतानुसारेण अभिधा - 'शक्त्या प्रतिपादकत्वम् अभिधा'।

**दोषः -**

दीक्षितस्य अभिधा लक्षणे पण्डितराज जगन्नाथः दोषद्वयं दर्शयति। यथा - १) असंगतिदोषः, २) आत्माश्रयदोषः।

१) प्रतिपादक निमित्तं ज्ञानमावश्यक। ज्ञाननिमित्तं शब्दार्थयोः पथ्यागमनम् आवश्यकम्। अत्र केवल शब्दः स्थितः असंगति दोषः भवेत्।

२) आत्माश्रयदोषः -

"शक्या प्रतिपादकत्वम् अभिधा।"

अत्र शक्त्या स्थले आत्माश्रयदोषः एवं प्रतिपादकत्वं स्थले असंगति दोषः। शब्दजन्य अर्थावोधे अभिधा एका शक्तिः न अन्या। अस्तु अभिधाया लक्षणे 'अभिधा' पदस्य प्रवेशः आत्माश्रयदोषं जनयति।

परन्तु (वैयाकरण) नागेशभट्ट मते "धान्येन धनवान्" इत्यत्रैव 'शक्त्या' तृतीयमस्याय दीक्षितमतं समर्थयति। हिन्दी रसगङ्गाधरकारः चतुर्वेदिमतानुसारं यदि द्वयोर्मध्ये सामान्यविशेषौ वर्त्तेते, तर्हि तत्र अभेदान्वयः भवति। अतः अत्र अभेदान्वयस्य अभावात् दीक्षितस्य मतं न युक्तियुक्तम्।

## पण्डितराजजगन्नाथमते अभिधायाः भेदः -

पण्डितराज मते अभिधा त्रिधा भवति -

१) केवल समुदायः शक्तिः, उदा. - डित्थ-डवित्थादि।

२) केवलावयवशक्तिः, उदा - पाचकपाठक।

३) समुदायवयवशक्तिसंकरश्चेति, उदा. -पङ्कजादि।

**तेषां नानान्तरम् -**

१) यत्र प्रकृति प्रत्ययभिन्नार्थान्तरस्य बोधः भवति तत्र रुढि भवति। उदा.- लावण्य, मण्डपप्रभृतयः।

२) यत्र प्रकृति प्रत्ययानुसारेण अर्थप्रतिपत्तिः भवति तत्र योगः शब्दः।

उदा. - पाचक, पाठक

३) यत्र प्रकृतिप्रत्ययसंवलितः अर्थान्तरप्रतीति भवति तत्र योगरूढि शब्दः । उदा. - पङ्कजादि

## दीक्षित मते अभिधा

१) अखण्डशक्तिमात्रेणैकार्थ प्रतिपादकत्व रुढिः ।

२) अवयवशक्तिमात्रसापेक्षं पदस्यौकार्थप्रतिपादकत्वं योगः ।

३) उभयशक्तिसापेक्षमेकार्य प्रतिपादकत्वं योगरूढिः ।

दीक्षितस्य मतखण्डनं कृत्वा जगन्नाथ कथयति - "कतिपय विशिष्ट शब्दाः भवन्ति ।"

१) अश्वगन्धा - औषधिः (रुढि), गन्धः (योगः)

२) अश्वकर्ण - औषधिः (रुढि), अश्वस्यकर्ण (योग)

३) कुवलयः - एककमलविशेषः (रुढि), पृथ्वीमण्डल (योग)

४) मण्डपः - गृहविशेषः, मण्डविशेषः (पेयः) ।

५) निशान्त - गृहं, प्रभातम् ।

### शङ्का -

अत्र प्रश्नः आगच्छति तेषु शब्देषु का शक्ति ? योग, रुढि अथवा योगरुढि । अत्र रुढि एवं योगार्थः पदस्य केवल विशेषणम् अस्ति । एवं यदि तृतीया शक्ति स्वीक्रियते तर्हि रुढि एवं योग अन्योः मध्ये अन्वयः न भवति ।

अन्ये केचित आचार्याः जगन्नाथस्य तृतीयाशक्त्याः भेदद्वयं दर्शयति ।

१) योगरुढि, उदा - पङ्कजादि ।

२) यौगिकरुढि, उदा - अश्वकर्णादि, पुनश्च जगन्नाथः तेषां मतं खण्डयित्वा कथयति - "अखण्डा एव हि शब्दाः ।"

**उदाहरणं -**

**गीष्पतिरप्याङ्गिरसो गदितुं ते गुणगणान् सगर्वो न ।**
**इन्द्रः सहस्रनयनोऽप्यदभूतरुपं परिच्छेत्तुम् ।।**

अस्मिन् श्लोके वृहस्पतेः विशेषणरूपे गीष्पति अङ्गीरस एवं इन्द्रस्य विशेषण रूपे सहस्रनयनः आदिशब्दस्य प्रयोगः किमर्थम् ?

## दीक्षित मते अभिधा

१) अखण्डशक्तिमात्रेणैकार्थ प्रतिपादकत्व रुढिः ।

२) अवयवशक्तिमात्रसापेक्षं पदस्यौकार्थप्रतिपादकत्वं योगः ।

३) उभयशक्तिसापेक्षमेकार्य प्रतिपादकत्वं योगरूढिः ।

दीक्षितस्य मतखण्डनं कृत्वा जगन्नाथ कथयति - ''कतिपय विशिष्ट शब्दाः भवन्ति ।''

१) अश्वगन्धा - औषधिः (रुढि), गन्धः (योगः)

२) अश्वकर्ण - औषधिः (रुढि), अश्वस्यकर्ण (योग)

३) कुवलयः - एककमलविशेषः (रुढि), पृथ्यीमण्डल (योग)

४) मण्डपः - गृहविशेषः, मण्डविशेषः (पेयः) ।

५) निशान्त - गृहं, प्रभातम् ।

### शङ्का -

अत्र प्रश्नः आगच्छति तेषु शब्देषु का शक्ति ? योग, रुढि अथवा योगरुढि । अत्र रुढि एवं योगार्थः पदस्य केवल विशेषणम् अस्ति । एवं यदि तृतीया शक्ति स्वीक्रियते तर्हि रुढि एवं योग अन्योः मध्ये अन्वयः न भवति ।

अन्ये केचित आचार्याः जगन्नाथस्य तृतीयाशक्त्याः भेदद्वयं दर्शयति ।

१) योगरुढि, उदा - पङ्कजादि ।

२) यौगिकरुढि, उदा - अश्वकर्णादि, पुनश्च जगन्नाथः तेषां मतं खण्डयित्वा कथयति - ''अखण्डा एव हि शब्दाः ।''

**उदाहरणं -**

**गीष्पतिरष्याङ्गिरसो गदितुं ते गुणगणान् सगर्वो न ।**
**इन्द्रः सहस्रनयनोऽप्यदभूतरुपं परिच्छेत्तुम् ।।**

अस्मिन् श्लोके वृहस्पतेः विशेषणरूपे गीष्पति अङ्गीरस एवं इन्द्रस्य विशेषण रूपे सहस्रनयनः आदिशब्दस्य प्रयोगः किमर्थम् ?

अत्र गीष्पति, अङ्गीरसः आदिद्वयं रुढि अर्थेः एव । अतः अत्र पुनरुक्ति दोषः भवति ।

**समाधानम् -**

प्रकरणाभावात् पुनरुक्ति दोषः भवति। जगन्नाथः कथयति - गीष्पत्यादि शब्दः योगरुढौ अस्ति। न तु रुढि अर्थेः। कारणं अत्र अवयवद्वयस्य सम्मेलने गीष्पतिशब्दस्य उत्पत्तिः भवति। अङ्गीरसः साक्षात् वृहस्पति। (अर्थात् रुढि अर्थः) प्रतीयते। अतएव पुनरुक्ति दोषः न।

## शङ्का -

पुनः पण्डितराज जगन्नाथेन अत्र शङ्का क्रियते। अत्र पुनरुक्ति दोषः न इति कथम् समीचिनम् ? कारणं गीष्पति शब्दः योगरुढि अर्थग्रहणे अत्र कोऽपि प्रकरणं नास्ति। एवं यदि गीष्पतिशब्दः 'वृहस्पति' अर्थे एव ज्ञायते तर्हि 'अङ्गीरस' इति व्यवहारस्य कः अभिप्रायः ? अर्थात् अत्र पुनरुक्ति दोषः अस्ति।

## समाधानम् -

पण्डितराज जगन्नाथ कथयति अस्मिन् स्थले गीष्पति शब्दः लाक्षणिकार्थे अस्ति। अतः पुनरुक्ति दोषः न ।

## निष्कर्षः -

अत्र पदद्वयस्य प्रयोगः भविष्यति। एकः रुढि लाक्षणिक अर्थे अपरः अङ्गीरस विशेषण रूपे। जगन्नाथस्यैषा कृतिः यद्यपि नव्यन्याशैलिकारणात् काचित् जटिला संजाता, किन्तु परिष्कृतप्रस्तुति कारणादेव अद्यावधि एतादृशी काचित् अपरा कृतिः दृष्टिपथि नागच्छतीति इत्येवं साधु इति रसगंगाधरकारदृशा अभिधानिरुपणं सामान्यवचोभिः।

## सन्दर्भग्रन्थाः

१. झा, पण्डित मदनमोहन, रसगंगाधरः (प्रथमाननम्), चौखम्बा विद्याभवन, वाराणसी, १९८७।
२. झा, पण्डित मदनमोहन, रसगंगाधरः (द्वितीयमाननम्), चौखम्बा विद्याभवन, वाराणसी, १९८७।
३. शर्मा, डा. रामाधार, रसगंगाधरः (प्रथमाननम्), भारतीय विद्या प्रकाशन, दिल्ली, २०११।